श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीविवाहवरदस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीविवाहवरदस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अन्तस्स्थस्त्वमशेषाणाम्
अन्तस्स्थमपि वाञ्छितम्।
आपूरयसि यत्तस्मात्
अन्तस्स्थघटिताह्वयः॥ **1** ॥

राते ! भृगूणां चरणं त्वदीयम्
अरातिमस्माकमितोऽपनेतुम्।
पाप्मानमेनं शरणं प्रपन्नं
श्रीवत्सवक्षः ! परिपाहि वत्सम्॥ **2** ॥

राते ! भृगूणामपि भार्गवस्त्वम्
अर्चावतारेऽपि च भार्गवस्य।
पुत्रत्वमासाद्य परं प्रसिद्धः
तद्वंशजाते मयि तत्प्रसीद॥ **3** ॥

किं वा रघूणां किमु वा यदूनाम्
अथो भृगूणां रतिरन्ववाये।
तव प्रभो ! सत्त्वमये भृगूणाम्
अर्चावतारेऽपि यदत्र जातः॥ **4** ॥

कविक्रतुं भार्गवमत्र पूर्वम्
आराधयन्नङ्गिरसो गुरुस्त्वाम्।

शतक्रतोराप स शापमुक्तः
    सतीं गतिं गीष्पतिरित्यवैमि ॥ 5 ॥

रामावतारेऽपि च हस्तिनाथ !
    भृग्वङ्गिरस्साम्यमुपैति दीप्त्या।
इतीव सक्तस्त्रिजटे स पूर्वम्
    अदा मुदा गा भगवन्नसङ्ख्याः ॥ 6 ॥

श्रीमता रामभद्रेण श्रीरामनवमीमहे।
श्रीमतो देवराजस्य सञ्चारो दृशि वर्तते ॥ 7 ॥

तावन्न चेत्त्वमुपगच्छसि शार्ङ्गधन्वे -
    त्यन्तस्सदा निगमशेखरसूरिसूक्तिम्।
सञ्चिन्तयन् भजसि मामिति चापहस्त -
    रामाकृतिश्च मम दर्शनमेषि स त्वम् ॥ 8 ॥

पट्टाभिषेको विहतो ममाऽपि
    कालेन भूयोऽपि बभूव तस्मात्।
तथा विवाहोऽपि कुमारिकायाः
    तवेति मा चिन्तय चिन्तयेमम् ॥ 9 ॥

कपीन्द्रमादौ परितापभाजं
    नापालयं वत्स ! दिने परस्मिन्।
विहत्य शत्रुं यदपालयं तं
    कवीन्द्र ! तच्चिन्तय तत्त्वमन्तः ॥ 10 ॥

इत्येवमग्रे कथयन्निव त्वं
    मां रक्षितुं वा करिशैलनाथ !।
मातुस्सभां ते किमु वीक्षितुं वा
    मुहुर्मुहुस्सञ्चरणं विधत्से ॥ 11 ॥

हस्ते हस्ते गोकुले गोपिकानां
    हस्ते हस्तिक्ष्माधरे चावतीर्णम्।
मस्ते मस्ते वेदवाचां चरन्तं
    मस्ते हस्तौ संयुतौ न्यस्य नौमि॥ **12**॥

मत्पापकोट्या विहते विवाहे
    तवावतारोत्सवपुण्यकाले।
श्रीपुण्यकोट्यामिह सञ्चरंस्त्वं
    विवाहविघ्नं विधुनोषि सत्यम्॥ **13**॥

विवाहमाहुर्विबुधा भवन्तं
    विशेषतोऽस्मिन् नगरे स सेव्यः।
विवाह आसीद्विहतोऽत्र नाथ !
    विधीशसंसेव्य ! विधेहि युक्तम्॥ **14**॥

त्वदर्थमेवाहमितो गतस्तं
    सम्प्रार्थ्य नाथं वरदं समागाम्।
मा भीतिमेया इति वेदमौलि -
    गुरुस्सभारम्भदिने नु वक्ति॥ **15**॥

सभान्तरा वारणशैलनाथः
    श्रीक्षीरनद्यामवतीर्य चागात्।
गुरूत्तमक्षीरप एष कुक्षौ
    ममापि भूयोऽप्यदधात्स दुग्धम्॥ **16**॥

ब्रह्माश्वमेधे रचितावतारं
    ब्राह्मे मुहूर्ते कलितप्रयाणम्।
ब्राह्मेण घोषेण पवित्रमार्गं
    ब्राह्मं परं बिम्बमहं स्मरामि॥ **17**॥

द्रमिडनिगमगोष्ठ्या स्तूयमानं पुरस्तात्
सुभगधवलपीनच्छत्रयुग्माभिरामम्।
अमरफणितिवेदैः पृष्ठतो रक्ष्यमाणं
स्मरति मम मनस्तं सर्वदा देवराजम्॥ **18** ॥

करिशिखरिविटङ्कात् कल्पकं कञ्चिदेकं
कमलकलितलीलां काश्यपीं चापि कान्ताम्।
कनकमणिमयाङ्गीं पार्श्वयोर्लालयन्तं
कलय हृदय ! नित्यं काङ्क्षितान् भुङ्क्ष्व भोगान्॥ **19** ॥

जङ्घाभिः परिपूरिताऽपि सततं यानैस्तथान्यैरपि
प्राण्याद्यैः परितो वृताऽपि झटिति प्राप्ते हरावद्भुतम्।
या पुण्ड्राङ्कितदेहवैष्णवमयी वेदद्वयीघोषणा
काञ्चीसन्निधिवीथिकाऽतिसुभगा सा भातु चित्ते सदा॥ **20** ॥

आनैजालयमानिलात्मजकुलं सञ्चारमातन्वतः
मूर्तिं कामपि देवदेव ! भवतस्सञ्चिन्तये सन्ततम्।
गम्भीरां मधुरां विभूषणगणैरत्युज्ज्वलां दामभिः
पुष्पाणां सुभगां श्रिया वसुधया संसेवितां सादरम्॥ **21** ॥

अग्नेरुत्पतितोऽसि तेन तव ते देहे व्रणानां किणाः
सान्द्रा हन्त तथापि हन्त जनतामाकर्षयन्त्यद्भुतम्।
न्यस्तास्तत्र तथा हि दृष्टय इमा नैव व्रणानां गणाः
देहे युक्तमिदं तथा हि भगवन् ! श्रीदेवराजो यतः॥ **22** ॥

दीपैर्मौलिधृतैः प्रदीपनिचयैर्मत्ताप्पुदीपैर्वृतः
प्रान्तोद्यत्करदीपिकोदितमहाकर्पूरनीराजितः।
शोभां काञ्चन वीथिकामधि भवान् सान्तः पुरस्संवमन्
मालान्तर्गत ! मे मनश्च नयनं दिव्यामृतैस्सिञ्चति॥ **23** ॥

खड्गं केटकमावहन्ननुगतः श्रीसूत्रवत्याः पतिः
पूर्णा सन्निधिवीथिकाऽपि मनुजैः त्वद्रूपमुग्धेक्षणैः।
कल्याणं बत दर्शनं च वितरन् सान्तः पुरो यद्गवान्
यात्राभून्न वनाय सेयमवनायैवेति मन्ये मम॥ **24** ॥

विघ्ने जाते तन्निहन्तुं क्षणेन
विष्वक्सेनं खड्गकेटौ दधानम्।
पश्चात्कुर्वन् प्रस्थितो दर्शनीयो
मन्दं मन्दं मां नु पातुं वनं वा॥ **25** ॥

हस्त्यद्रिनाथेति भवन्तमीड्यं
तं हस्तिनाथेति वदन्ति सन्तः।
हस्ती स साक्षान्नहि शैल एषः
हस्त्यद्रिरास्ते पिशिताक्षिभाजाम्॥ **26** ॥

देवीं त्वदीयां किल हस्तिनाद -
प्रबोधिनीं वेदगिरो वदन्ति।
तस्याः पुरस्तादयमेव हस्ती
तस्मिन् हि नादो ननु वेदवाचाम्॥ **27** ॥

श्रीसूक्तमेवं वदतीदमास्तां
श्रीवत्सचिह्नाः कवयो महान्तः।
परं भवान् वस्त्विति हस्तिनैव
त्रया समुद्घोषितमित्युदाह॥ **28** ॥

तद्धस्तिनाथेति पदं प्रमादात्
तद्धस्तिनादेति वदन्ति विप्राः।
नो चेन्महादेव्यभिधानमत्र
कथं घटेतेति वद त्वमत्र॥ **29** ॥

वरद ! ननु सरस्त्वं त्वां प्रपन्नो नरोऽहं
    वरमिह यदि दद्याः वाञ्छितं मे तदानीम्।
सवर इति समस्तैः कीर्तितोऽहं भवेयं
    तव च भवति कीर्तिस्साम्यदायीति सत्या ॥ **30** ॥

षड् देव्यस्तव षड्गिरस्त्वदुदिताः षट् ते गुणाश्शोभनाः
    षड्वङ्गश्रुतिरूप ! षट्श्र्यनुगताः अर्थाश्च षड् युक्तयः।
षड्नामीक्षणषण्मुखादिनुत हे ! षट्कत्रयाचार्य ! ते
    षड्भ्रातृव्यषडूर्मितप्तहृदयः कुर्वे षडङ्गां नुतिम् ॥ **31** ॥

वेदोद्धारण ! मन्दरागभरण ! श्लाघ्यक्षमाधारण !
    प्रह्लादस्थितमानसात्ममहिमश्रीगोपनैकव्रत !।
श्रीमच्छ्रीभृगुवंशजात ! वरद ! श्रीलक्ष्मणातिप्रिय !
    श्रीमद्यामुनकर्षणाप्तमधुर ! स्वामिन् ! कलेः पाहि नः ॥ **32** ॥

श्रीवारणाद्रिनिलयाय मनोहराय
    श्रीवात्स्यदेशिकसुताय हितप्रदाय।
श्रीवारिजातभवयज्ञसमुद्भवाय
    श्रीवाञ्छिताय वरदाय नमो नमोऽस्तु ॥ **33** ॥

वरदं विषयीकृत्य स्तोत्रं श्रीनिधिना कृतम्।
वरदं तदिदं चापि पठतां भक्तिपूर्वकम् ॥ **34** ॥

॥ इति श्रीविवाहवरदस्तवः समाप्तः ॥